कार्या द्विजोत्तम ! । नाडीभिर्विकटं दिव्यं शूलाग्रं वेधयेच्छुभम् । पादाङ्गुष्ठात् कपालान्तं रश्मिमण्डलमावृतम् । तिर्य्यक् चाधोर्द्ध्वभागेभ्यः प्रयान्त्योऽतीव तेजसा । चिन्तयेत् साधकेन्द्रस्तं यावत् सर्वं महामुने ! । भस्मीभूतं शरीरं स्वन्तस्यैवोपसंहरेत् । शीतश्लेष्मादय स्तापा विनश्यन्ति द्विजाऽऽमयाः । शिरोग्रीवाकरे चैव कण्ठे चोरोमुखे स्मरेत् । ध्यायेदच्छिन्नचित्तात्मा पयोभूतेन चात्मना । स्फुरच्छीकरसंस्पर्शप्रभूते हिमगात्मभिः । धाराभिरखिलं विश्वमापूर्य्य भुवि चिन्तयेत् । ब्रह्मरन्ध्राच्च संक्षोभाद्यावदाधारमण्डलम् । सुषुम्नान्तर्गतो भूत्वा संपूर्णेन्दुकृतालयम् । संप्लाव्य हिमसंस्पर्शतोयेनामृतमूर्त्तिना । क्षुत्पिपासाक्रमप्रायसन्तापपरिपीड़ितः । धारयेद्वारुणीं मन्त्री तुष्ट्यर्थं चाप्यतन्द्रितः । वारुणी धारणा प्रोक्ता ऐशानीं धारणां शृणु । व्योम्नि ब्रह्ममये पद्मे प्राणापाने क्षयङ्गते । प्रसादं चिन्तयेद् विष्णोर्यावच्चिन्ता क्षयं गता । महातारमपेत् सर्वं ततो व्यापक ईश्वरः । अर्द्धेन्दुं परमं शान्तं निराभासनिरञ्जनम् । असत्यं सत्यमाभाति तावत्सर्वं चराचरम् । यावत् स्वस्वन्दरूपन्तु न दृष्टं गुरुवक्त्रतः । दृष्टे तस्मिन् परे तत्त्वे आब्रह्म सचराचरम् । प्रमातृमानमेयञ्च ध्यानहृत्पद्मकल्पनम् । मातृमोदनवत् सर्वं जपहोमार्चनादिकम् । विष्णुमन्त्रेण वा कुर्य्यादमृतां धारणां वदेत् । संपूर्णेन्दुनिभं ध्यायेत् कमलं तच्छिमूर्त्तिकम् । शिरःस्थं चिन्तयेद् यत्नाच्छशाङ्कायुतवर्चसम् । सम्पूर्णमण्डलं व्योम्नि शिवकल्लोलपूरितम् । तथा हृत्कमले ध्यायेत्तन्मध्ये स्वतनुं स्मरेत् । साधको विगतक्लेशो जायते धारणादिभिः” । २७४अ० ।

काशीख० ४१ अ० विशेषोऽप्युक्तो यथा

“प्राणायामद्विषट्केन प्रत्याहार उदाहृतः । प्रत्याहारैर्द्वादशभिर्धारणा परिकीर्त्तिता । भवेदीश्वरसङ्गत्यै ध्यानं द्वादशधारणम्” “प्रत्याहारेण सम्बद्धो धारणालय चाभ्यसेत् । हृदये पञ्चभूतानां धारणं यत् पृथक् पृथक् । मनसो निश्चलत्वेन धारणा साऽभिधीयते । हरितालनिभां भूमिं सालङ्कारां समेधसम् । चतुष्कोणां हृदि ध्यायेदेषा स्यात् क्षितिधारणा । कण्ठेऽम्बु तत्त्वमर्द्धेन्दुनिभं विष्णुसमन्वितम् । वकारवीजं कुन्दाभं ध्यायेदम्बु जयेदिति । तालुस्थमिन्द्रगोपाभं त्रिकोणं रेफसंयुतम् । रुद्रेणाधिष्ठितं तेजोध्यात्वा वह्निं जयेदिति । वायुतत्त्वं भ्रुवोर्मध्ये वृत्तमञ्जनसन्निभम् । यं वीजमीशदैवत्यं ध्यायेद्वायुं जयेदिति । आकाशञ्च मरीचिधारसदृशं यद्ब्रह्मरन्ध्रस्थितं यन्नाथेन सदाशिवेन सहितं शान्तं हकाराक्षरम् । माथं तत्र विलीय पञ्चघटिकं चित्तान्वितं धारयेदेषा मोक्षकपाटनपटुः प्रोक्ता नभोधारणा । स्तम्भनी प्लावनी चैव शोषणी भ्रामणी तथा । शमनी च भवन्त्येता भूतानां पञ्च धारणाः” हं०सं०उक्ते जलसूचके वायुविशेषधारणादात्मके ३योगभेदे च “ज्यै४सितेऽष्टम्याद्याश्चत्वारो वायुधारणादिवसाः । मृदुशुभपवनाः शस्ताः स्निग्धघनस्थगितगगनाश्च । तत्रैव स्वात्याद्ये दृष्टे भचतुष्टये क्रमान्मासाः । श्रावणपूर्वा ज्ञेयाः परिस्रुता धारणास्ताः स्युः । यदि ताः स्युरेकरूपाः शुभास्ततः सान्तरास्तु न शिवाय । तस्करभयदाः प्रोक्ताः श्लोकाश्चाप्यत्र वाशिष्ठाः । सविद्युतः सपृषतः सपांशूत्करमारुताः । सार्कचन्द्रपरिच्छन्ना धारणाः शुभधारणाः । यदा तु विद्युतः श्रेष्ठाः शुभाशाप्रत्युपस्थिताः । तदापि सर्वसस्यानां वृद्धिं ब्रूयाद्विचक्षणः । सपांशुवर्षाः सापाश्च शुभा बालक्रिया अपि । पक्षिणां सुस्वरा वाचः क्रीडा पांशुजलादिषु । रविचन्द्रपरिवेषाः स्निग्धा नात्यन्तदूषिताः । वृष्टिस्तदापि विज्ञेया सर्वसस्याभिवृद्धये । मेघाः स्निग्धा संहताश्च प्रदक्षिणगतिक्रियाः । तदा स्यान्महती वृष्टिः सर्वसस्यार्थसाधिका” २२अ० ।

**धारणी** स्त्री धारि—ल्युट् । १श्रेण्यां “शारीरिकधारणी शिथिलान्” दशकु० । २नाड़िकायां ३वुद्धानां मन्त्रभेदे मेदि० ४श्रेण्याम् हेमच० । [पु० राजनि० ।

**धारणीय** त्रि० धारि—कर्मणि अनीयर् । १धार्य्ये २धरणीकन्दे

**धारणीययन्त्र** न० धार्य्यते धारि—कर्मणि अनीयर् कर्म० । धार्य्ये देवताभेदानां यन्त्रभेदे तच्च पूजायन्त्राद्दिलक्षणं शारदायां २४ पटले दृश्यम् । तल्लेखनद्रव्यादि तत्रोक्तं यथा ‘‘काश्मीररोचनालाक्षाकस्तूरीमदचन्दनैः । विलिखेद्वै मलेखन्या यन्त्राण्येतानि देशिकः” । निषिद्धयन्त्रमुक्तम् “भूमिस्पृष्टं शवस्पृष्टं दग्धं निर्माल्यसङ्कुलम् । विशीर्णं लङ्घितं मन्त्री यन्त्रं जातु न धारयेत्” मन्त्रमहोदधौ १८ तरङ्गे । तल्लेखनप्रकारद्रव्यादिकमुक्तं तत्रैव दृश्यम् । विस्तरभयात् न लिखितं, कर्मभेदे सामान्यतोलेखनद्रव्यादिकं २५तरङ्गे तत्रोक्तं यथा “चन्दनं रोचना राजिस्रष्टं कृधूमचितामवः । अङ्गारोऽष्टविषाणीति मान्याद्रौ यन्त्रलेखने । पूर्वोक्तलेखनद्रव्यं दृश्यम् गृह्णीयात्तदपि ध्रुवम् ।